# प्रथमः पाठः
## भारतीवसन्तगीतिः (कक्षा - IX)

### अभ्यासः

**1.** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत -

(क) कविः वीणापाणिं किं कथयति ?

उत्तर - कविः वीणापाणिं नवीनाम् वीणां वादयितुम् ललितनीति-लीनां गीतिं मृदुं च गातुम् कथयति ।

(ख) वसन्ते किं भवति ?

उत्तर - वसन्ते मधुरमञ्जरी-पिञ्जरीभूतमालाः सरसाः रसालाः लसन्ति । ललित-कोकिलाकाकलीनां कलापः च विलसन्ति ।

(ग) सरस्वत्याः वीणां श्रुत्वा किं परिवर्तनं भवतु इति कवेः इच्छां लिखत ।

उत्तर - सरस्वत्याः वीणां श्रुत्वा लतानां नितान्तं शान्तिशीलं सुमं चलेत् नदीनां न कान्तसलिलं सलीलम् उच्छलेत् इति कवेः इच्छा अस्ति ।

(घ) कविः भगवतीं भारतीं कस्याः नद्याः तटे (कुत्र) मधुमाधवीनां नतां पङ्क्तिम् अवलोक्य वीणां वादयितुं कथयति ?

उत्तर - कविः भगवतीं भारतीं कालिन्दात्मजायाः (यमुनायाः) तटे मधुमाधवीनां नतां पङ्क्तिम् अवलोक्य वीणां वादयितुम् कथयति ।

**2.** 'क' स्तम्भे पदानि, 'ख' स्तम्भे तेषां पर्यायपदानि दत्तानि । तानि चित्वा पदानां समक्षे लिखत -

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (क) सरस्वती | (1.) तीरे |
| (ख) आम्रम् | (2.) अलीनाम् |
| (ग) पवनः | (3.) समीरः |
| (घ) तटे | (4.) वाणी |
| (ङ) भ्रमराणाम् | (5.) रसालः |

(क) सरस्वती → (4.) वाणी
(ख) आम्रम् → (5.) रसालः
(ग) पवनः → (3.) समीरः
(घ) तटे → (1.) तीरे
(ङ) भ्रमराणाम् → (2.) अलीनाम्

AMAN SRI (SANSKRIT)

Scanned by TapScanner

3. अधोलिखितानि पदानि प्रयुज्य संस्कृतभाषया वाक्यरचनां कुरुत —

(क) निनादय - शारदे! मधुराम् वीणां निनादय।

(ख) मन्दमन्दम् - रामः मन्दमन्दम् धावति।

(ग) मारुतः - शुद्धः मारुतः स्वास्थ्यलाभप्रदः भवति।

(घ) सलिलम् - स्वच्छम् सलिलम् पानीयम्।

(ङ) सुमनः - उद्याने मनोहरम् सुमनः विकसति।

4. प्रथमश्लोकस्य आशयं हिन्दीभाषया आङ्ग्लभाषया वा लिखत — हे सरस्वती / हे वाणी! नवीन वीणा को बजाओ सुन्दर नीतियों से परिपूर्ण गीत का मधुर गान करो।

5. अधोलिखितपदानां विलोमपदानि लिखत —

(क) कठोरम् - कोमलम्

(ख) कटु - मधुरम्

(ग) शीघ्रम् - शनैः शनैः

(घ) प्राचीनम् - नवीनम्

(ङ) नीरसः - सरसः

* श्लोक का अन्वय पाठ्यपुस्तक पृष्ठ सं० - 5 में दिया हुआ है।

—: इति :—

AMAN SIR SANSKRIT

Scanned by TapScanner